१७

अवस्थात्रयविचारः

प्रस्तावना

दर्शनानानि आस्तिकानि नास्तिकानि चेति द्वेधा व्यवह्रियन्ते। आस्तिकदर्शनेषु अन्यतमो भवति वेदान्तः। वेदानामन्तिमो भागः भवति वेदान्तः। वेदः कर्मकाण्डः ज्ञानकाण्डश्चेति द्विविधः। कर्मकाण्डे यागादिकर्मणां विचारः तथा ज्ञानकाण्डे ब्रह्मविचारश्च स्तः। तत्र ब्रह्मविचारपरस्य ज्ञानकाण्डस्य विचारः वेदस्यान्तिमभागे विद्यतेति तस्य वेदान्त इति नामधेयम्। वेदान्त इति मुख्यतया उपनिषदां नाम। उपनिषदां तात्पर्यविचारः यैः ग्रन्थैः क्रियते ते वेदान्तपदबोध्याः भवन्ति। तथाच ब्रह्मसूत्रं भगवद्गीता तद्भाष्यादिकञ्च। वेदान्तो नाम उपनिषद्प्रमाणं तदुपकारीणि शरीरकसूत्रादीनि चेति उक्तं वेदान्तसारे। मतभेदेन वेदान्तः बहुधा व्यवह्रियते। तत्र अद्वैतं भेदाभेदं विशिष्टाद्वैतं द्वैतं शुद्धाद्वैतम् इत्यादयः मुख्याः सम्प्रदायाः भवन्ति। एतेषां यथाक्रमं प्रवर्तकाः भवन्ति शङ्कराचार्यः भास्कराचार्यः रामानुजाचार्यः मध्वाचार्यः वल्लभाचार्यश्च।

उद्देश्यानि

पाठस्यास्याध्ययनेन-

- वेदान्तस्य सामान्यज्ञानं लभ्यते।
- अद्वैतवेदान्तशब्दस्य विशेषार्थः अवगम्यते।
- वेदान्तस्य इतरविभागानां परिचयः प्राप्यते।
- वेदान्तप्रतिपाद्यानां मुख्यतत्त्वानां ज्ञानम् उपलभ्यते।
- शङ्कराद्याचार्याणां परिचयः सामान्यतया उपलभ्यते।
- अवस्थात्रयविषये सुष्ठु बोधः लभ्यते।
- आत्मनः चतुष्पात्त्वं सम्यगवगम्यते।
- विश्ववैश्वनरादिस्वरूपमवबुद्ध्यते।

१७.१) अद्वैतशब्दार्थः

न विद्यते द्वैतं यस्मिन् तत् अद्वैतमिति तस्यार्थः। तत अद्वैतशब्दस्य अर्थविशेषः विचार्यते। द्वाभ्याम् इतं द्वीतम्। जीवजगद्भ्यामितं विशिष्टं ब्रह्मैव द्वीतम्। द्वीतस्य भावः द्वैतम्। द्वैतस्याभावः अद्वैतम्। न द्वैतम् अद्वैतम्। एवञ्च ब्रह्मणः जीवजगद्भ्यां विशिष्टत्वं ये नानुमन्यन्ते त एवाद्वैतिनः।

द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते।

तन्निषेधेन चाद्वैतं प्रत्यग् वस्त्वभिधीयते॥ (बृहदारण्यकभाष्यवार्तिकम् - ४.३.१९०७)

एवञ्च शुद्धं चैतन्यमेव अद्वैतम्। चैतन्यस्यैव प्रत्यक्त्वेनात्र अवधानात्। ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर इति भवति अद्वैतस्य मुख्यं प्रतिपाद्यम्। दर्शनेषु वेदान्तस्य तत्राद्वैतस्य च स्थानम् अतीवप्राधान्यमर्हति।

१७.२) आत्मनः त्रीणि रूपाणि

वेदान्तशास्त्रस्य मुख्यः विषयो भवति जीवब्रह्मणोरैक्यम्। अथवा जीवात्मनः परमात्मनश्च अभेदज्ञानम्। तस्य अभेदस्य प्रतिपादनं कर्तुं शास्त्रे नैके उपायाः स्वीकृताः वर्तन्ते। तत्र एकस्योपायस्य प्रदर्शनार्थम् अयं विचारः स्वीकृतो वर्तते। तथा च परमात्मनः अधिदैवतं सविशेषाणि त्रीणि रूपाणि सन्ति। तथैव जीवात्मनः अध्यात्मं च सविशेषाणि त्रीणि रूपाणि सन्ति। अधिदैवतम् इत्यस्य देवतात्मकमित्यर्थः। अध्यात्मम् इत्यस्य जीवात्मकमित्यर्थः। तथा च अधिदैवतं त्रीणि रूपाणि भवन्ति ईश्वरः, हिरण्यगर्भः विराट् च। अध्यात्मं तु विश्वतैजसप्राज्ञभेदेन त्रीणि रूपाणि। तत्र वैश्वानरस्य स्थानं भवति जाग्रत्। तैजसस्य स्थानं भवति स्वप्नः। प्राज्ञस्य स्थानं सुषुप्तिश्च।

१७.३) तिस्रः अवस्थाः

शरीरस्थस्य जीवात्मनः तिस्रः अवस्थाः सन्ति। ताश्च जाग्रत् स्वप्नः सुषुप्तिः च। परपस्परविलक्षणाः भवन्ति एता अवस्थाः। जाग्रदवस्थायां स्वप्नः नास्ति। स्वप्नावस्थायां जाग्रदपि नास्ति। ते द्वे अपि सुषुप्तौ न स्तः। निरुपाधिकस्य ब्रह्मणः स्वरूपम् अवगन्तुमेव एताः अवस्थाः निरूप्यन्ते शास्त्रे। सर्वोपाधिवर्जितं ब्रह्म एताभ्यः अवस्थाभ्यः अपि मुक्तं भवततीति अनेन प्रतिपाद्यते। एताभ्यः अवस्थाभ्यः भिन्ना काचिदवस्था जीवस्य नास्ति एव। अवस्थात्रयमपि शरीरस्थः जीव एव अनुभवति। कोऽयं जीवः? अवस्थाश्च काः?

१७.४) जीवस्वरूपम्

जीवो नाम अन्तःकरणावच्छिन्नं चैतन्यमिति ज्ञेयम्। ब्रह्मादिवत् जीव अपि विभुः नित्यः सन्मात्रचैतन्यमस्ति। स एवास्य नामरूपात्मकस्य जगत आधारभूत आस्ते। इन्द्रियमनोऽहंकाराद्युपाधिभिः पृथक् पृथक् अविच्छिन्नः आत्मैव जीवः। आत्मा तु सदेकः तथापि उपाधिभेदेन अनेकजीवस्वरूपेण प्रतीयते। एवम् अकर्ता आत्मा कर्ता भवति। अभोक्ता आत्मा भोक्ता च भवति। सुखी दुःखी च भवति। कर्तृत्वभोक्तृत्वादिकम् उपाधिकृतं न तु वास्तविकम्। जीवः परमात्मनः न अंशः अस्ति। नैव तस्य परिणामः अस्ति। किन्तु तस्य विवर्तरूपप्रतीतिमात्र एव। जीव एव संसारी भवति। तस्यैव बन्धमोक्षौ च। जीव एव पापपुण्यादीनि उपार्जयति तत्फलं भुङ्क्ते च। जीवस्य जीवत्वं वह्नेः उष्णत्ववत् न स्वाभाविकम् किन्तु कल्पितमेव। मोहान्धकारे अहमिति भ्रान्तिबुद्ध्या जीवत्वं भजति। तत्त्वमस्यादिजन्यज्ञानेन जीवः अज्ञानं विनाशयित्वा स्वस्वरूपमाप्नोति। ब्रह्मविदाप्नोति परम् इति तैत्तिरीयश्रुतेः।

पाठगतप्रश्नाः-१

१. वेदान्तो नाम कः?

२. वेदः कतिविधः?

३. ज्ञानकाण्डस्य अपरं नाम किम्?

४. अद्वैतवेदान्तप्रवर्तकः कः?

५. द्वैतवेदान्तप्रवर्तकः कः?

६. विशिष्टाद्वैतस्य प्रवर्तकः कः?

७. वेदान्तस्य मुख्यः विषयः कः?

८. आत्मनः कति रूपाणि?

९. जीवस्य अवस्थाः कति?

१०. जीवो नाम कः?

१७.५) जाग्रदवस्था

जागरणं नाम इन्द्रियैः अर्थोपलब्धिः। इन्द्रियाणि ज्ञानकर्मभेदेन दश। तैरिन्द्रियैः विषयैः साकं सन्निकर्षं प्राप्य जीवः यदा सुखदुःखे अनुभवति तदा जीवः जागर्ति इति वक्तुं शक्यते। जीवस्य स्थूलविषयोपभोगः भवति जाग्रदवस्थायाम्। जाग्रत्काले जीवः यद्यद्विषयविशेषम् अनुभवति तस्य सर्वस्यापि चित्ते वासनारूपेण स्थितिर्भवति। लौकिकवैदिककर्मणां सुखदुःखादिफलभोगाय धर्माधर्मयोश्च तथा बन्धमोक्षप्राप्तये च एतद्वासनायुक्तं जाग्रदेव आश्रयं भवति।

जाग्रति प्रमातृप्रमाणप्रमेयव्यवहाराः भवन्ति। तत्र प्रमाणैः यः अर्थं प्रमिणोति स प्रमाता। येन प्रमिणोति तत् प्रमाणम्। यत् प्रमीयते तत् प्रमेयमिति विवेकः। तत्र प्रमाता जीवश्चेतनो भवति। जाग्रदवस्थायां जीवस्य वैश्वानर इति नाम भवति।

१७.६) वैश्वानरः

आत्मनः चत्वारः पादाः सन्ति। सोऽयमात्मा चतुष्पात् इति माण्डूक्यवाक्यमेव तत्र प्रमाणम्। पद्यते गम्यते अवगम्यते ब्रह्मात्मैक्यम् एभिरिति पादाः विश्वादयः। विश्वः तैजसः प्राज्ञ ईश्वरः इति चत्वारः पादाः।

विश्व एव वैश्वानरो भवति। विश्वेषां नराणां नयनाद् वैश्वानरः यद्वा विश्वश्चासौ नरश्चेति विश्वानरो, विश्वानर एव वैश्वानरः इति। जाग्रदवस्थायां विद्यमानः आत्मा भवति प्रथमः पादः।

बाह्यविषयेषु एव अस्य प्रज्ञा अवभासते। अतः अयं बहिष्प्रज्ञः भवति। एवमेव अयं जागरितस्थानः सप्ताङ्गः एकोनविंशतिमुखः स्थूलभुक् च भवति। तथा च श्रुतिः

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्गो एकोनविंशतिमुखः

स्थूलभुग्वैश्वानरः प्रथमः पादः इति।

मूर्धा सुतेजा, चक्षुर्विश्वरूपः, प्राणः पृथग्वर्त्मात्मा, सन्देहो बहुलो, वस्तिरेवरयिः, पृथिव्येव पादौ, मुखम् आहवनीयाग्निः इत्येवं भवन्ति वैश्वानरस्य सप्ताङ्गानि। ज्ञानेन्द्रियपञ्चकं, कर्मेन्द्रियपञ्चकं, प्राणादिपञ्चकं, बुद्धिः, मनः, अहङ्कारः, चित्तम् इत्येवं तस्य नवदशमुखानि सन्ति। एतैः वैश्वानरः शब्दादिस्थूलविषयान् भुङ्क्ते। अनेन एव द्वितीयस्य पादस्य प्राप्तिर्भवतीति कारणात् अयं वैश्वानरः प्रथमः पादः। जाग्रदवस्थायां स्थूलशरीराभिमानी भवति विश्वः।

१७.७) स्थूलशरीरम्

उपाधितन्त्रो भवति जीवः। शरीरं तत्र एक उपाधिः। शरीरञ्च त्रिविधम्। स्थूलशरीरं सूक्ष्मशरीरं कारणशरीरञ्च। त्रीणि शरीराणि आत्मनि कल्पितानि भवन्ति। तत्र कारणं भवति अज्ञानम्। जाग्रदवस्थायां स्थूलशरीरस्य प्राधान्यमस्ति। किन्नाम स्थूलशरीरमिति जिज्ञासा भवति। चक्षुषा वीक्षमाणाः हस्तपादमस्तकादयः स्थूदेहस्य अंशाः भवन्ति। मज्जास्तिमेदाः चर्मरक्तमांसादयश्च तस्यांशा एव। तदुक्तं-

मज्जास्तिमेदः पलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम्

पादोरुवक्षो भुजपृष्ठमस्तकैरंगैरुपांगैरुपयुक्तमेतत्।

अहं ममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः॥७४॥ (विवेकचूडामणिः)

अशितस्य अन्नस्य स्थूलमध्यमसूक्ष्मभेदेन त्रिधा विभागो ज्ञेयः। तेजसो घृतादेः मध्यमो भागः मज्जा। तस्य स्थविष्ठो भागः अस्थि। तस्य पूर्वपरिणामः मेदः। पलं मांसम्, अशितस्य अन्नस्य मध्यमो भागः लोहितं, पीतानाम् अपां मध्यमो भागः, चर्म स्थूलावरणं, त्वक् सूक्ष्मावरणम् आन्तरान्धातून् नाड्यादींश्च सप्तावरणानि आवृण्वन्ति। एतादृशैः अवयवैः युक्तं भवति स्थूलशरीरम्। स्थूल शरीरम् आत्मनः नास्ति। तथापि अज्ञानात् स्वकीयं मनुते। ततश्च तेषु अहं स्थूलः अहं कृशः अहं सुन्दरः इत्येवंविधः अहंत्वाभिमानः भवति। अहं ब्रह्मणः अहं क्षत्रियः इति तत्र विशेषः। तत्र मम पादौ मम हस्तौ मम देहः इत्येवविधः ममताभिमानश्च भवति। अज्ञानप्रयुक्ताध्यासादेव अहमिदं ममेदमिति नैसर्गिकः लोकव्यवहारः।

स्थूलशरीरं जीवस्य भोगायतनं भवति। जाग्रत्काले वैश्वानरः दिग्वातार्कवरुणाश्विभिः क्रमाद् नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमात् शब्दस्पर्शरूपरसगन्धान्तान् स्थूलविषयान् अनुभवति। अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमाद् नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद् वचनादानगमनविसर्गानन्दान् स्थूलविषयान् अनुभवति। चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमाद् नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येन अन्तरिन्द्रियचतुष्केण क्रमात् सङ्कल्पविकल्पनिश्चयाहङ्कार्यचैत्तांश्च स्थूलविषयान् वैश्वानरः अनुभवति। इत्युक्तं वेदान्तसारे। स्थूलभुक् वैश्वानर इति तत्र प्रमाणम्।

पाठगतप्रश्नाः-२

११ जागरणं किम्?

१२ स्थूलविषयोपभोगः कदा भवति?

१३ प्रमाता कः?

१४ आत्मनः चत्वारः पादाः के?

१५ जागरितस्थानः कः?

१६ त्रिविधानि शरीराणि कानि?

१७ जीवस्य भोगायतनं किम्?

१७.८) स्वप्नः

स्वप्नो नाम जागरितसंस्कारप्रत्ययः सविषयः। जाग्रदवस्थातः अत्यन्तं भिन्ना काचिदवस्था भवति स्वप्नः। अत्र इन्द्रियाणां प्रवृत्तिर्नास्ति तेषां मनसि लीनत्वात्। इन्द्रियाणाम् अभावे स्वप्नस्थविषयाणां दर्शनं कथं सम्भवतीति जिज्ञासायामुच्यते साक्षिद्वारा इति। अन्तःकरणोपहितं चैतन्यमेव साक्षीत्युच्यते। तदा इन्द्रियाणाम् उपरमे सत्यपि मनसः प्रवृत्तिर्भवति। अतः जाग्रत्कालीनस्थूलविषयेभ्यः इन्द्रियाणाम् उपरमेऽपि मनः अनुपरतं सत् विषयान् सेवते। यद्यपि स्वप्नकाले स्थूलविषयाः न सन्ति तथापि सूक्ष्मविषयाः सन्त्येव। तथा च ज्ञायते-

इन्द्रियाणाम् उपरमे मनोऽनुपरतं यदि सेवते

विषयानेव तद्विद्यात् स्वप्नदर्शनम्॥

स्वप्नकाले शरीरस्य जडता नास्ति प्राणस्य सत्त्वात्। स्वप्नकाले जाग्रत्कालीनवत् सर्वोऽपि व्यवहारः सम्भवति। तत्र रथाः रथचालकाः अश्वाः मार्गाश्च सन्ति। कथं सन्ति इति चेत् जीवः एतत् सर्वं सृजति। अतः स्वप्नलोकः जीवस्य सृष्टिरिति श्रुतिर्वदति।

न तत्र रथा रथयोगानपन्थानो भवन्त्यथ रथयोगान् पथः सृजते -(बृह. ४.३.१०)

स्वप्नस्थविषयाः जाग्रत्कालीनवत् न परमार्थाः किन्तु मिथ्या एव। न परमार्थगन्धोऽप्यस्ति। (सू.भ.-३.२.३) अतः तत्र क्रियमाणेन पुण्येन पापेन वा जीवस्य सन्बन्ध एव नास्ति। यद्यपि स्वप्नः जाग्रदवस्थानुभूतविषयाणां स्मृतिः भवति। पूर्वदृष्टस्य स्मृतिर्हि प्रायेण स्वप्नः। (बृ.सू.भा.४.३.९) इह जन्मनि अनुभूतनानां विषयाणामेव स्वप्नदर्शनं भवतीति न मन्तव्यं तद्व्यतिरिक्तम् इह अननुभूतमपि स्वप्नस्य विषयो भवति। परलोकस्थविषयाणामपि दर्शनं स्वप्नकाले अस्ति। यद्यपि परलोकस्थसुखदुःखे साक्षान्नानुभवति तथापि तद्दर्शनं भवतीति सर्वेषामनुभवः।

स्वप्ने अनुभूताः अश्वगजादिविषायाः प्रातिभासिकाः भवन्ति। ते यावत्प्रतिभासमवतिष्ठन्ते। स्वप्नः स्वकाले सत्यवद्भाति प्रबोधे चासद्भवेत्। यथा स्वप्नकाले मनःकल्पितानि सुखदुःखाभयादिहेतूनि वस्तूनि सत्यवद्भान्ति प्रबोधे चासन्ति भवेयुः। तथाज्ञानकाले द्वैतमिदं जगत् सत्यवद्भात्वा सर्वव्यवहारास्पदं भूत्वा सुखदुःखाद्यनुभवान् भावयित्वा आत्मप्रबोधे च निश्शेषं निवर्तते। वस्तुतः जाग्रत्प्रपञ्चः मिथ्या भवति, किन्तु लोकानां तथा अनुभवः नास्ति। शास्त्राचार्योपदेशसिद्धः परोक्षानुभवस्तु केषाञ्चिदस्ति। स्वप्नविषये तथा नास्ति। तस्य मिथ्यात्वं सर्वानुभवगम्यमेव। स्वप्नस्थविषायाः प्रबोधकाले नानुभोक्तुं शक्याः तेषां कल्पिततत्वेन प्रतीतिकालमात्रसत्ताकत्वात्। स्वप्ने कश्चन आत्मानं राजानं पश्यति। प्रबोधे च स दरिद्र एव भवति न तु राजा। स्वप्नस्थविषयाः क्षणिकाः न तु दीर्घकालिकाः। एवं जाग्रत्प्रपञ्च अपि स्वप्नतुल्यो द्रष्टव्यः।

१७.९) तैजसः

तैजसः आत्मनो द्वितीयः पादः भवति। तेजोमयान्तःकरणोपहितत्वात् जीवस्य तैजस इति नाम। तेजोमयत्वञ्चात्र वासनामयत्वमेव। वासना च जाग्रदवस्थायाम् अन्तःकरणवृत्तिद्वारा तत्तदिन्द्रियैः ये ये शब्दादिविषयाः जीवेन स्थूलरूपेण अनुभूताः तेषां संस्काराः सूक्ष्मरूपेण मनसि वर्तन्ते, तेषां नाम भवति वासना इति। तैजसस्य स्थानं भवति स्वप्नः। अतः अयं स्वप्नस्थानः इत्यभिधीयते। स्वप्नसूक्ष्मशरीराभिमानी भवति तैजसः। स्वप्ने वासनारूपेणैव प्रज्ञायाः स्थितिर्भवति। वैश्वानरः स्थूलविषयान् साक्षादनुभवतीति हेतुना तस्य प्रज्ञा स्थूला भवति। किन्तु स्वप्नकाले जाग्रत्कालीनान् वासनाभूतान् सूक्ष्मविषयान् अनुभवति इति हेतुना तैजसस्य प्रज्ञा सूक्ष्मा भवति। तत्काले सूक्ष्मविषयान् अनुभवति इति स प्रविविक्तभुक् इति कथ्यते। जाग्रत्कालीनवत् स्वप्नस्थभोगाः न स्थूलाः, तेभ्यः अत्यन्तं विविक्ताः वर्तन्ते इति प्रविविक्तभुक्। अस्य प्रविविक्ताहारतरः इत्यपि नामान्तरमस्ति। स्वप्नलोके जीवस्य कृते अन्नस्य अतिसूक्ष्मांश एव आहारो भवति। अन्नस्य मध्यमांशद् अत्यन्तं विविक्तः इति। अतः अयं तैजसः प्रविविक्ताहारतरश्च भवतीति बृहदारण्यके अस्ति (बृ-४.२.३)।

स्वेन सम्पादितानां वासनानाम् अनुरोधेन मनोद्वारा अन्तः एव प्रज्ञा जीवस्य उत्पद्यते। अतः अयं तैजसः अन्तःप्रज्ञश्च भवति। एवं सप्ताङ्गः एकोनविंशतिमुखः प्रविविक्तभुक् च भवति। वैश्वानरस्य यथा सप्ताङ्गादयः वर्णिताः तथा अस्यापि द्रष्टव्याः। तथा च श्रुतिः

स्वप्नस्थानोन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः

प्रविविक्तभुक् तौजसो द्वितीयः पाद इति।

१७.१०) सूक्ष्मशरीरम्

जाग्रति स्थूलशरीरं सम्यगवभासेत्युक्तम्। तर्हि स्वप्नकाले कस्य शरीरस्य भानमिति जिज्ञासायामुच्यते सूक्ष्मशरीरस्य इति। किन्नाम सूक्ष्मशरीरम्। सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। तदुक्तमभिज्ञैः मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम् इति। लिङ्ग्यते ज्ञाप्यते

प्रत्यगात्मसद्भाव एभिरिति लिङ्गानि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं बुद्धिमनसी वायुपञ्चकञ्चेति। तदुक्तं शङ्कराचार्येण विविकचूडामणौ-

वागादिपञ्च श्रवणादिपञ्च

प्राणादिपञ्चाभ्रमुखानि पञ्च।

बुद्ध्याद्यविद्यापि च कामकर्माणि

पुर्यष्टकं सूक्ष्मशरीरमाहुः॥ (वि.चू. ९८)

ज्ञानसाधनानीन्द्रियाणि ज्ञानेन्द्रियाणि। तानि च श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। यथाक्रमं शब्दस्पर्शरूपरसगन्धाः तेषां विषयाश्च भवन्ति। कर्मणः साधनानि इन्द्रियाणि कर्मेन्द्रियाणि। तानि च वाक्पाणिपादपायूपस्थाख्यानि। यथाक्रमं वचनादानगमनविसर्गानन्दसाधकत्वं भवति एतेषाम्। तथा च वागिन्द्रियं वचनं साधयति। वागिन्द्रियं विना कथने वयम् असमर्था एव। पाणिः आदानं साधयति। विना पाणिसाहाय्यं कस्यचित् वस्तुनः आदानं नैव सम्भवति। पादः गमनं साधयति। पद्भ्यां विना क्रमित्वा देशान्तरं प्रति गन्तुं न शक्नोति। पायुः विसर्जनं साधयति। शरीरस्थस्य मलस्य विसर्जनं पाय्वाख्येन इन्द्रियेणैव भवति। सुखसाधकमिन्द्रियं भवति उपस्थम्। मूत्रविसर्जनसाधकं तथा सुखसाधकञ्चेन्द्रियं भवति उपस्थम्। तथा च प्रश्नोपनिषद्वाक्यमस्ति।

वाक् च वक्तव्यं च हस्तौ च दातव्यं च उपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च

पादौ गन्तव्यञ्च। इति। (प्र.उप. ४.८)

अथ बुद्धिमनसोश्च का गतिरिति चिन्त्यते। बुद्धिर्नाम निश्चयात्मिका अन्तःकरणवृत्तिः भवति। मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः भवति। चित्तस्य अहंकारस्य च अनयोरेव अन्तर्भावात् तयोः पृथक् विचारः नापेक्षते। तदुक्तं वेदान्तपारिभाषायाम्-

मनो बुद्धिरहंकारश्चित्तं करणमान्तरम्।

संशयो निश्चयो गर्वः स्मरणं करणमान्तरम्॥ इति॥

अन्तःकरणं चतुर्धा भवति। मनः बुद्धिः अहंकारः चित्तं च इति। तत्र संशयः- मनसः विषयो भवति। निश्चयः बुद्धेः विषयो भवति। गर्वः अहङ्कारस्य, स्मरणं च चित्तस्य विषयौ स्तः। अनुसन्धानात्माकान्तःकरणवृत्तिः चित्तम्। अभिमानात्मिकान्तःकरणवृत्तिः अहङ्करः। स्मृतिः अनुभवजन्या भवति। अनुभवशच निश्चयात्मकः। अतः निश्चयात्मिकायां बुद्धौ एव चित्तस्य अन्तर्भावः। अहङ्कारस्य सङ्कल्पविकल्पात्मकत्वात् सः मनसि चान्तर्भवति।

अथ पञ्च वायवः चिन्त्यन्ते। प्राणापानव्यानोदानसमानाः पञ्च वायवः। प्राणो हि प्राग्गमनवान् नासाग्रवर्ती। अपानो हि अवाग्गमनवान् पाय्वादिस्थानवर्ती। व्यानो हि विष्वग्गमनवान् अखिलशरीरवर्ती। उदानो हि कण्ठस्थानीय ऊर्ध्वगमनवान् उत्क्रणवायुः। समानो हि शरीरमध्यगताशितपीतान्नादिसमीकरणकरः इति उक्तं वेदान्तसारे। तदुक्तं विवेचूडामणौ

प्राणापानव्यानोदानसमानाः भवत्यसौ प्राणः।

स्वयमेव वृत्तिभेदाद् विकृतिभेदात् सुवर्णसलिलादिवत्॥ (वि.चू. ९७)

एवञ्च पूर्वोक्तं सप्तदशावयवोपेतं सूक्ष्मशरीरस्य भानं भवति स्वप्ने। अतः अस्य शरीरस्य विभक्त्यवस्था भेदकावस्था भवति स्वप्नः। अत्र स्थूलदेहाभावात् सूक्ष्मदेहे एव अभिमानो भवति।

१७.११) प्राज्ञः

प्राज्ञः आत्मनो तृतीयः पादः भवति। व्यष्ट्यज्ञानोपहितं चैतन्यं प्राज्ञः इत्युच्यते। सुषुप्तिकारणशरीराभिमानी भवति प्राज्ञः। प्रकर्षेण अज्ञः इति प्राज्ञो भवति। एकाज्ञानावभासकत्वात् अस्य प्राज्ञत्वम्। प्राज्ञस्य स्थानं भवति सुषुप्तिः अथवा गाढनिद्रा। सुषुप्त्यवस्थायां विद्यमानः आत्मा प्राज्ञः भवति। सुषुप्तिकाले स्थूलविषयाः सूक्ष्मविषयाः वा न सन्ति। केवलम् अज्ञानमेव अवभासते। अतः सः अज्ञानमात्रसाक्षी भवति। अज्ञानावभासकत्वात् अस्य प्राज्ञ इति नाम इति केचित्। कारणशरीराभिमानी भवति प्राज्ञः। कारणशरीरवर्णनन्तु अग्रे भविष्यति। कारणशरीरे अभिमानवान् इत्यस्य तादात्म्याध्यासेन अहम् इत्यभिमानवान् भवति जीव इत्यर्थः। अविनाशिस्वरूपानुभवरूपा प्रज्ञा यस्य भवति सः प्रज्ञः, प्रज्ञ एव प्राज्ञः इति केषाञ्चित् मतम्।

अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा।

सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान्॥ (पञ्चदशी-१.१७)

सुषुप्तौ प्राज्ञः आत्मना ऐक्यं प्राप्नोति। सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते छान्दोग्ये अस्ति। स्वपितीति अस्य जीवस्य लोकप्रसिद्धं नाम भवति। जाग्रति जीवस्य उपाधिर्भवति अन्तःकरणम्। अतः स अन्तःकरणोपाधिकः सन् विषयान् गृह्णाति। स्वप्ने तद्वासनाविशिष्टः सन् स्वप्नं पश्यन् मनःशब्दवाच्यो भवति। तदुपाधिद्वयमपि सुषुप्तौ नास्ति। अतः तदुपाधिकृतः विशेषोऽपि नास्ति। अतः आत्मनि तस्य लयो भवतीति तात्पर्यम्। ततश्च स आनन्दमनुभवति। अतः आनन्दभुक् भवति। आनन्दं भुङ्क्ते इति आनन्दभुक्। आनन्दः स्वरूपानन्दः। सुषुप्तस्थानः एकीभूतः प्रज्ञानघन एवानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः इति माण्डूक्ये अस्ति। आनान्दस्य भोगार्थं तत्र अन्तःकरणवृत्तिः नास्ति इति शङ्का न कार्या। तत्र तदभावेऽपि अज्ञावृत्तिरस्त्येव। तस्य जडत्वेऽपि चैतन्येन प्रदीप्ता भवति। तथा च चैतन्यप्रदीप्ताभिः अतिसूक्ष्माभिः अज्ञानवृत्तिभिः स आनन्दम् अनुभवति।

१७.१२) सुषुप्तिः

सुषुप्तिः गाढनिद्रा एव। सुषुप्तिर्नाम सर्वविषयज्ञानाभावः। जाग्रत्प्रपञ्चात् स्वप्नप्रपञ्चाच्च अत्यन्तं भिन्ना सुषुप्तिरियं ज्ञेया। स्थूलविषयाः सूक्ष्मविषयाश्च न सन्ति। तत्र विषायाणां भानमेव नास्ति। इन्द्रियाणां मनसश्चात्रोपरमः ज्ञेयः।

प्रबोधकाले जीवः स्थूलसूक्ष्मशरीरद्वारा, स्वप्ने च अन्तःकरणद्वारा स्वकर्मणा भोगान् अनुभूतवान्। अत्र जीवः अत्यन्तम् आयासमनुभूतवान्। यथा पक्षिणः वियदि बहुदूरम् उड्डयनं कृत्वा

आयासात् विश्रान्तिमुद्दिश्य स्वकीयं पञ्जरमुपगत्य प्रविशति। तथा जीवः अपि अन्यत्रावस्थाद्वये स्वकर्मणा आयासेन श्रान्तः सन् विश्रान्तये सुषुप्तिं प्राप्नोति। तथा च श्रुतिः-

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियते एवमेवायं पुरुष एतस्मा अन्ताय धावति। (बृह.भा. ४.३.१९)

पक्षिणः परिपतनश्रमम् अपनोतुं स्वनीडं प्रति यथा आगच्छति, तथा जाग्रदवस्थायां स्वप्नावस्थायाञ्च कार्यकरणसंयोगजक्रियाफलैः संयुज्यमानस्य श्रमो भवति। तादृशं श्रमं निवर्तयितुं एव जीवः स्वाश्रयस्थानं सुषुप्तिं गच्छति। सर्वसंसारधर्मविलक्षणः सर्वक्रियाकारकफलायासशून्यश्च यः आत्मा तमात्मानं प्रविशतीति तात्पर्यम्। स्वप्नाभावेन या निद्रा भवति सा एव सुषुप्तिर्जीवस्य। जाग्रत्स्वप्नयोः मनः चञ्चलं भवति। सुषुप्तौ तु निश्चलं भवति।

अत्यन्तम् आश्चर्यम् एतदवस्थायाः किमिति चेत् अपृष्ट्वा एव कस्यचित् सुषुप्तिकालीनः अनुभवः ज्ञातुं शक्यते। किन्तु जाग्रत्स्वप्नयोः तथा नास्ति। जाग्रत्काले स्वप्नकाले च किं किम् अनुभूतमिति पृष्ट्वा एव ज्ञातुं शक्यते। जाग्रत्काले रुग्णः कश्चन कथयति वैद्यम्- भो वैद्य मम पादे वेदनास्तीति तच्च विना कथनेन अवगन्तुं न शक्यते। अपृष्ट्वा वैद्यः स्वयं न कथयति- तव पादे वेदना अस्तीति। एवं ह्यः अहमेकं स्वप्नं दृष्टवानति श्रुत्वा कीदृशः स्वप्नः इति प्रश्नः भवति। व्याघ्रस्य इति समाधानम्। व्याघ्रेण किं कृतम् इत्येवं पौनःपुन्येन आकाङ्क्षया प्रश्नान् कृत्वैव अपरस्य स्वप्नानुभवः सम्यगवबुध्यते। ह्यः मया सम्यक् सुप्तम् इति श्रुत्वा स्वापः कथमासीत् तत्र किं किमनुभूतमित्यादिप्रश्नाः न क्रियन्ते केनचिदपि। सुषुप्त्यनुभवः अत्यन्तं सुखकरः इति सर्वे जानन्ति एव। कोऽपि विशेषः तत्र नास्ति।

कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वाशयीत। (बृ-२.१.१९)

सुषुप्तौ संसारो नास्ति। बालको वा स्त्री वा पुरुषो वा महाराजो दरिद्रो वेति भेदं विना सर्वेषामपि सुखमित्येकैवावस्था भवति। अत्रत्यः आनन्दः अतिघ्नी इत्यभिधीयते। यतः दुःखगन्धोऽपि नास्ति तत्र।

सुषुप्तिकालीनानुभवः कीदृश इति जिज्ञासायामुच्यते अज्ञानानन्दयोरनुभव इति। सुप्तोत्थितस्य पुरुषस्य वाक्यमस्ति- सुखेन सुप्तः न किञ्चिन्मया ज्ञातम् इति। अनेन सुप्तोत्थितस्य स्मृत्या अवगम्यते यत् तेन सुषुप्तौ सुखम् अज्ञानञ्च अनुभूतमिति। न अननुभूतस्य कस्यचित् स्मृतिर्भवितुमर्हति। सुप्तोत्थितस्य वाक्यं स्मृतिरेव भवति। स्मृतिश्च अनुभवजन्या इति सुप्तस्य अज्ञानानन्दयोरनुभवः आसीदिति स्वीकरणीयम्।

सुप्तोत्थितस्य सौषुप्ततमो बोधो भवेत् स्मृतिः।
सा चावबुद्धविषयावबुद्धं तत्तदा तमः॥ (पञ्चदशी-१.५)

१७.१३) कारणशरीरम्

अविद्या एव आत्मनः कारणशरीरं भवति। अस्य कारणशरीरस्य असाधारणी अवस्था भवति सुषुप्तिः। स्थूलस्य जाग्रत्कालभानवत् कारणशरीरस्य सुषुप्तौ एव सम्यक् भानमस्ति। अज्ञानस्य नाशः भवति ब्रह्मज्ञानेन। शरीरमपि नश्यति। अतः नाशसाम्यात् अज्ञानस्यापि शरीरमिति नाम। स्थूलसूक्ष्मप्रपञ्चकारणं भवतीति कारणत्वम्। जीवस्य स्वयं क इति ज्ञानं नास्ति। एतदेव जीवस्य अज्ञानम्। अस्माद् अज्ञानात् भ्रान्तिर्भवति। स्वयं स्थूलदेहः इति मनुते। ततश्च अहं पुरुषः भवामि स्त्री भवामि ब्राह्मणो भवामि इत्येवं मूढविचारं करोति। ततश्च रागद्वेषादिवशात् भिन्नं भिन्नं कर्म करोति। तेषां कर्मणां फलं स्वान्तःकरणेन युक्तं भवति। तस्य फलस्य उपभोगाय पुनः पुनः जन्म सम्भवति। प्रति जन्म सूक्ष्मशरीरस्यायतनाय स्थूलशरीरं स्वीकरोति। अस्य सर्वस्यापि कारणम् अज्ञानमेव भवति।

अज्ञानं समष्ट्यभिप्रायेण एकं भवति वनवत्। व्यष्ट्यभिप्रायेण अनेकञ्च भवति वृक्षवत्। व्यष्टिः विशेषः, समष्टिः सामान्यञ्च। वस्तुतः अज्ञानमेकं भवति। तच्च प्रति जीवं भिन्नं भिन्नमस्ति। जीवगतं नानात्वेन भासमानम् अज्ञानं समष्ट्यभिप्रायेण एकं भवति। समष्ट्यज्ञानोपहितं चैतन्यं भवति ईश्वरः। ईश्वरस्य इयं समष्टिः अखिलकारणत्वात् कारणशरीरं भवति। आकाशादयः अत्रैव उपरमन्ते इति महासुषुप्तिः अथवा प्रलयो भवति।

व्यष्ट्यभिप्रायेण अज्ञानमनेकमित्युक्तम्। व्यष्ट्यज्ञानोपहितं चैतन्यं भवति प्राज्ञः। अहङ्कारादीनां सुषुप्त्यवस्थायां संस्कारावशेषेण स्थितस्य कारणत्वात् इयं व्यष्टिः कारणशरीरं भवति। इह हि जाग्रत्प्रपञ्चः स्वप्नप्रपञ्चो वा न स्तः। सर्वेषां विषयाणामिह उपरमत्वात् सुषुप्तरिति नाम।

१७.१४) सुषुप्तौ जगद्भानाभावः

जाग्रत्काले स्थूलप्रपञ्चः अस्ति। स्वप्नकाले सूक्ष्मप्रपञ्चः अस्ति। सुषुप्तिकाले प्रपञ्चः नास्ति। वेदान्ते मनसः अतिरिक्ता अविद्या नास्ति। अतः संसारबन्धकारणभूता अविद्या मन एव। मनसः सत्त्वे एव देहादौ अभिमानरूपः बन्धः भवति, मनसः असत्त्वे स बन्धो नास्ति। एवं मनसः अन्वयव्यतिरेकेण बन्धकारणत्वं सिद्धम्। स्वप्ने मनसः जागरणात् जाग्रद्वासनायुक्तमनसा विजृम्भितः प्रपञ्चः जीवेन अनुभूयते। स्वप्नवत् जाग्रत्यपि मन एव सर्वं सृजति। अतः सर्वमेतत् मनसः विजृम्भणमात्रमेव।

स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या
भोक्त्रादि विश्वं मन एव सर्वम्।
तथैव जाग्रत्यपि नो विशेषः
तत्सर्वमेतन्मनसो विजृम्भणम्॥ (वि.चू. १७२)

सुषुप्तिकाले मनसः लयसम्भवात् मनःकारणभूतः जाग्रत्प्रपञ्चः स्वप्नप्रपञ्चो वा न स्तः। कारणाभावे कार्याभावात्। मनसः अस्तित्वं जाग्रति स्वप्ने चैव भवति। तदा एव प्रपञ्चानुभवश्च। अतः दृश्यमानः प्रपञ्चः मनसा कल्पित एव। सुषुप्तौ मनसः विलयात् विषयः नास्ति। सर्वेषां प्राणिनाम् अयमेक

एवानुभव अस्ति सुषुप्तौ 'न किञ्चदवेदिषम्' इति। मनसः सत्त्वात् स्वप्नजाग्रतोः संसारोपलब्धिः, मनसः असत्त्वात् सुषुप्तौ तदनुपलब्धिश्च।

सुषुप्तिकाले मनसि प्रलीने

नैवास्ति किञ्चित्सकलप्रसिद्धेः।

अतो मनःकल्पित एव पुंसः

संसार एतस्य न वस्तुतोऽस्ति॥ (वि.चू. १७३)

जाग्रति स्थूलशरीरस्य भानं स्पष्टमस्ति। स्वप्ने सूक्ष्मशरीरस्य भानञ्च स्पष्टमस्ति। सुषुप्तौ तु कारणशरीरस्य भानमेवास्ति स्पष्टतया। अज्ञानमेव कारणशरीरं भवति।

अव्यक्तमेतत्त्रिगुणैर्निरुक्तं

तत्कारणं नाम शरीरमात्मनः। (वि.चू. १२२)

सुषुप्तिः प्रलीनसर्वेन्द्रियबुद्धिवृत्तिर्भवति। सर्वाणि इन्द्रियाणि बुद्धिः तद्वृत्तयश्च तत्र न सन्तीति तात्पर्यम्। तथापि वासनानां नाशस्तु नास्त्येव। वासना बीजरूपेण अवतिष्ठते। तस्मात् पुनः जाग्रत्स्वप्नयोः सृष्टिर्भवति। वासनानां नाशाभावादेव कारणशरीरत्वमस्य।

पाठसारः

अत्र जीवात्मनः तिस्रः अवस्थाः प्रतिपादिताः। तथा च जाग्रदवस्था स्वप्नावस्था सुषुप्त्यवस्था च। जाग्रवदवस्थायां जीवस्य वैश्वानर इति नाम। स तदा स्थूलविषयान् अनुभवति। अतः स स्थूलभुक् भवति। बाह्यविषयेषु प्रवृत्तत्वात् बहिष्प्रज्ञश्च। स्वप्नावस्थायाम् अयं तैजसो भवति। तत्र सूक्ष्मविषयान् अनुभवतीति कारणात् स प्रविविक्तभुक् भवति। बाह्यप्रपञ्चानुभवाभावात् स अन्तःप्रज्ञः भवति। सुषुप्त्यवस्थायाम् आत्मनः प्राज्ञ इति नाम। तदा सः अज्ञानात्मककारणशरीराभिमानी भवति। तदा आनन्दमात्रमनुभवतीति स आनन्दभुक् भवति। जाग्रत्कालीनः स्थूलप्रपञ्चः स्वप्नकाले नास्ति। तथापि तद्वासनायुक्ताभिः मनोवृत्तिभिः सूक्ष्मप्रपञ्चस्य भानं भवति। प्रपञ्चद्वयमप्येतत् सुषुप्तौ नास्ति। तदा आत्मना सह एकीभूतो भवति प्राज्ञः। स्थूलात्मकस्य जाग्रत्प्रपञ्चस्य स्वप्नस्थस्य सूक्ष्मप्रपञ्चस्य च सुषुप्तौ लयः भवति। अतः सुषुप्तिः स्थूलसूक्ष्मप्रपञ्चलयस्थानमित्युच्यते। जाग्रति स्थूलशरीरस्य स्वप्ने लिङ्गशरीरस्य सुषुप्तौ कारणशरीरस्य च भानमस्ति।

पाठान्तप्रश्नाः

१. स्वप्नः कः?

२. स्वप्नप्रपञ्चः कीदृशः?

३. तैजसः कः?

४. किं सूक्ष्मशरीरम्?

५. अन्तःकरणस्य चातुर्विध्यम् किम्?

६. पञ्च वायवः के?

७. प्राज्ञस्य स्वरूपं किम्?

८. सुषुप्त्यवस्थां वर्णयत?

९. किं कारणशरीरम्?

१०. सुषुप्तौ जगतः भानं कुतो नास्ति ?

पाठगतप्रश्नानामुत्तराणि

१. वेदान्तो नाम उपनिषद्प्रमाणं तदुपाकारीणि शारीकसूत्रादीनि च।

२. द्विविधः

३. उपनिषत्

४. शङ्कराचार्यः

५. मध्वाचार्यः

६. रामानुजाचार्यः

७. जीवब्रह्मणोरैक्यम्

८. त्रीणि

९. तिस्रः

१०. अन्तःकरणावच्छिन्नं चैतन्यम्

११. इन्द्रियैः अर्थोपलब्धिः

१२. जाग्रति

१३. तत्र प्रमाणैः यो अर्थं प्रमिणोति स प्रमाता

१४. विश्वः तैजसः प्राज्ञ ईश्वर इति चत्वारः पादाः।

१५. वैश्वानरः

१६. स्थूलं सूक्ष्मं कारणम्

१७. स्थूलशरीरम्

॥ इति सप्तदशः पाठः ॥